# sItAShTottarashatanAmastotram 2

# સીતાષ્ટોત્તરશતનામસ્તોત્રમ્ ૨

## Document Information

Text title : sItAShTottarashatanAmastotram 2

File name : sItAShTottarashatanAmastotram2.itx

Category : devii, aShTottarashatanAma, sItA, raama

Location : doc_raama

Proofread by : PSA Easwaran psawaswaran at gmail.com

Description/comments : brahmayAmala shrIrAmarahasya

Latest update : March 10, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 27, 2019

*sanskritdocuments.org*

# સીતાષ્ટોત્તરશતનામસ્તોત્રમ્ ૨

સીતા સીરધ્વજસુતા સીમાતીતગુણોજ્જ્વલા ।
સૌન્દર્યસારસર્વસ્વભૂતા સૌભાગ્યદાયિની ॥ ૧॥

દેવી દેવાર્ચિતપદા દિવ્યા દશરથસ્નુષા ।
રામા રામપ્રિયા રમ્યા રાકેન્દુવદનોજ્જ્વલા ॥ ૨॥

વીર્યશુલ્કા વીરપત્ની વિયન્મધ્યા વરપ્રદા ।
પતીવ્રતા પઙ્ક્તિકણ્ઠનાશિની પાવનસ્મૃતિઃ ॥ ૩॥

વન્દારુવત્સલા વીરમાતા વૃતરઘૂત્તમા ।
સમ્પત્કરી સદાતુષ્ટા સાક્ષિણી સાધુસમ્મતા ॥ ૪॥

નિત્યા નિયતસંસ્થાના નિત્યાનન્દા નુતિપ્રિયા ।
પૃથ્વી પૃથ્વીસુતા પુત્રદાયિની પ્રકૃતિઃ પરા ॥ ૫॥

હનુમત્સ્વામિની હૃદ્યા હૃદયસ્થા હતાશુભા ।
હંસયુક્તા હંસગતિઃ હર્ષયુક્તા હતાસુરા ॥ ૬॥

સારરૂપા સારવચાઃ સાધ્વી ચ સરમાપ્રિયા ।
ત્રિલોકવન્દ્યા ત્રિજટાસેવ્યા ત્રિપથગાર્ચિની ॥ ૭॥

ત્રાણપ્રદા ત્રાતકાકા તૃણીકૃતદશાનના ।
અનસૂયાઙ્ગરાગાઙ્કાઽનસૂયા સુરિવન્દિતા ॥ ૮॥

અશોકવિનિકાસ્થાનાઽશોકા શોકવિનાશિની ।
સૂર્યવંશસ્નુષા સૂર્યમણ્ડલાન્તઃસ્થવલ્લભા ॥ ૯॥

શ્રુતમાત્રાઘહરણા શ્રુતિસન્નિહિતેક્ષણા ।
પુષ્પપ્રિયા પુષ્પકસ્થા પુણ્યલભ્યા પુરાતના ॥ ૧૦॥

પુરુષાર્થપ્રદા પૂજ્યા પૂતનામ્ની પરન્તપા ।
પદ્મપ્રિયા પદ્મહસ્તા પદ્મા પદ્મમુખી શુભા ॥ ૧૧॥

જનશોકહરા જન્મમૃત્યુશોકવિનાશિની ।
જગદ્રૂપા જગદ્વન્દ્યા જયદા જનકાત્મજા ॥ ૧૨॥

નાથનીયકટાકાક્ષા ચ નાથા નાથૈકતત્પરા ।
નક્ષત્રનાથવદના નષ્ટદોષા નયાવહા ॥ ૧૩॥

વહ્નિપાપહરા વહ્નિશૈત્યકૃદ્વૃદ્ધિદાયિની ।
વાલ્મીકિગીતવિભવા વચોઽતીતા વરાઙ્ગના ॥ ૧૪॥

ભક્તિગમ્યા ભવ્યગુણા ભાન્તી ભરતવન્દિતા ।
સુવર્ણાઙ્ગી સુખકરી સુગ્રીવાઙ્ગદસેવિતા ॥ ૧૫॥

વૈદેહી વિનતાઘૌઘનાશિની વિધિવન્દિતા ।
લોકમાતા લોચનાન્તઃસ્થિતકારુણ્યસાગરા ॥

શ્રીરામવલ્લભા સા નઃ પાયાદાર્તાનુપાશ્રિતાન્ ॥ ૧૬॥

કૃતાકૃતજગદ્ધેતુઃ કૃતરાજ્યાભિષેકકા ।
ઇદમષ્ટોત્તરશતં સીતાનામ્નાં તુ યા વધુઃ ॥ ૧૭॥

ધનધાન્યસમૃધ્દ્ધા ચ દીર્ઘસૌભાગ્યદર્શિની ।
પુંસામપિ સ્તોત્રમિદં પઠનાત્સર્વસિદ્ધિદમ્ ॥ ૧૮॥

ઇતિ બ્રહ્મયામલે રામરહસ્યગતં સીતાષ્ટોત્તરશતનામસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran psaeaswaran at gmail.com

---

*sItAShTottarashatanAmastotram 2*

pdf was typeset on December 27, 2019

Please send corrections to *sanskrit@cheerful.com*